दिनाङ्क :- 19.09.2025

प्रात: - 06:55

## केन्द्रीय वित्तमन्त्री निर्मला सीतारमणः

केन्द्रीय वित्तमन्त्री निर्मला सीतारामन्वर्या, ह्यः, कोलकाता-नगरस्य राष्ट्रियपुस्तकालये, अग्रिमवंशश्रेणिक-जीएसटी-परिष्कार-समित्या आयोजिते कार्यक्रमे नूतन-जीएसटी- परिष्कारस्य लक्ष्याणि रेखांकितवती। सा अवदत्, यत् वस्तुसेवाकरस्य (जीएसटी) परिष्कारस्य उद्देश्यं देशस्य कर-राजस्व-व्यवस्थायाः सरलीकरणं आधुनिकीकरणं च वर्तते।

बाइट- 2100 निर्मला सीतारामन

## जीएसटी-परामर्षदः:

उपभोक्तृकार्याणाम्, खाद्यं तथा सार्वजनिक-वितरण-मन्त्रालयेन संशोधित-जीएसटी-मूल्यविषये, संशोधित-परामर्षः विज्ञापितः, यद्धि सोमवासरात् प्रभावी भविष्यति । परामर्षानुसारं निर्मातारः, आयातकादयः च स्व-इच्छानुसारं सितम्बर् मासस्य द्वाविंशति-दिनाङ्कात् पूर्वं निर्मितानाम् अविक्रीत-वस्तूनाम् उपरि अतिरिक्त-संशोधित-मूल्यस्टिकर्-चिह्नं स्थापयितुं शक्नुवन्ति किन्तु तदुपरि मुद्रितं मूल-एम.आर.पी मूल्यं अस्पष्टं न भवेत्। मन्त्रालयेन स्पष्टीकृतं यत् नियमेषु एतादृशं पुनः संशोधित-मूल्यस्टिकर्-चिह्नं स्थापनं तावदनिवार्यं नास्ति, तथा च ये संस्थाः संशोधितमूल्यानि घोषयितुम् इच्छन्ति तेषां कृते एतत् शुद्धरूपेण वैकल्पिकम् अस्ति।

## भारत नील नौकास्थानानां

भारतं, संयुक्तराष्ट्रसङ्घस्य खाद्यकृषिसंघटनं (FAO) च विश्वस्तरीयनील-नौकास्थानाकानां निर्माणार्थं हस्तं मिलितवन्तौ। मत्स्यपालनं, पशुपालनं, दुग्धपालनम् इत्येतेषां मन्त्रालयस्य

अन्तर्गतं मत्स्य-विभागेन, भारते, नील-नौकास्थानस्य आधारभूतसंरचनायाः सुदृढीकरणाय खाद्यकृषिसंघटनेन सह प्रौद्योगिकी-सहकार-कार्यक्रम-सन्धौ हस्ताक्षरं कृतम् अस्ति ।

<u>डीजीसीए चारधाम</u>

नागरिक-उड्डयन-महानिदेशालयेन (DGCA) मानसून-विरामस्य अनन्तरं, ऐषमः चतुर्धामयात्रार्थं हेलिकॉप्टर-सञ्चालनस्य पुनरारम्भस्य अनुमोदनं कृतम् । नागरिकविमानमन्त्रालयेन विज्ञप्तौ उक्तं यत् चतुर्धाम-सञ्चालनस्य सुरक्षावर्धनार्थं कठोर-परीक्षणानन्तरं रणनीतिक-परिकल्पनाः कार्यान्विताः सन्ति ।

<u>संघ लोकसेवा आयोगेन</u> ::

संघ लोकसेवा आयोगेन विभिन्नपरीक्षाणां समये शीघ्रं सुरक्षितं च अभ्यर्थीसत्यापनार्थं कृतक-बुद्धिमत्ताक-मुख-प्रमाणीकरण-प्रौद्योगिक्याः परीक्षणार्थं पैलट् इति परीक्षा-कार्यक्रमः सफलतया सम्पादितः । अस्मिन् मासे चतुर्दशे दिनाङ्के आयोजिते NDA, AND, NA II EXAMINATION, तथा CDS II EXAMINATION इत्यस्य समये एषः पायलट् कार्यक्रमः प्रचालितः। गुरुग्रामस्य चयनितकेन्द्रेषु एषः-प्रयोगः कृतः, यत्र अभ्यर्थीनां मुखस्य चित्राणि तेषां पञ्जीकरण-प्रपत्रेषु प्रदत्तैः छायाचित्रैः सह डिजिटल्-रूपेण मेलनं कृतम्, नूतनप्रणाल्याः सत्यापनसमयः प्रति अभ्यर्थिनः परिमित्या, केवलं अष्ट-तः दश सेकेण्ड् यावत् न्यूनीकृतः । एषः उपक्रमः राष्ट्रिय-ई-शासन-विभागस्य सहकारेण कृतः आसीत् ।

**पेन्शन योजना अन्तिमतिथिः:**

**वित्तमन्त्रालयेन केन्द्रसर्वकारकर्मचारिणां पूर्वनिवृत्तानां च कृते राष्ट्रियपेंशनव्यवस्थायाः (NPS) एकीकृतपेंशनयोजनायां (UPS) परिवर्तनस्य अन्तिमदिवसः, सितंबर मासस्य त्रिंशत् दिनाङ्कः इति घोषणा कृता अस्ति । एकस्मिन् वक्तव्ये मन्त्रालयेन उक्तं यत् यूपीएस-अन्तर्गतं सपात्र-कर्मचारिणः एकवारं एव एनपीएस-इत्यत्र परिवर्तनं कर्तुं शक्नुवन्ति।**

**केन्द्रीय शिक्षा मंत्री धर्मेन्द्र प्रधानः NEP 2020::**

**केन्द्रीय शिक्षा मंत्री धर्मेन्द्र प्रधानः विद्यालयशिक्षायां राष्ट्रियशिक्षानीतिः (NEP) 2020 इत्यस्य कार्यान्वयनविषये समीक्षासभां कृतवान् । सोशल मीडिया सन्देशे श्रीप्रधानेन उक्तं यत् मन्त्रालयः शिक्षाव्यवस्थायाः आधुनिकीकरणाय, शिक्षणं अधिकं आनन्ददायकं, छात्रकेन्द्रितं च कर्तुं प्रतिबद्धः अस्ति । तेनोक्तं, यत् मन्त्रालयेन राष्ट्रस्य छात्राणां कृते विश्वस्तरीयं विद्यालयशिक्षणं प्रदास्यते ।**

**बैडमिण्टन् :**

**बैडमिण्टन-क्रीडायां ह्यः शेन्झेन्-नगरे चैना-मास्टर्स्-क्रीडायाः महिला-एकल-क्वार्टर्-फायनल्-क्रीडायाः मध्ये द्विवारं ओलम्पिकपदकविजेता भारतस्य पी.वी.सिन्धुः पराक्रमं प्रदर्श्य थाईलैण्डदेशस्य चोचुवोङ्ग् इत्यस्याः पराजयं कृतवती । अधुना सा दक्षिणकोरियादेशस्य एन् से यङ्ग् इत्यनया सह क्वार्टर्फाइनल्-क्रीडायां स्पर्धिष्यति । अपरत्र भारतस्य - पुरुषयुगलयुगलं सत्विक-सैराज-रङ्किरेड्डी, चिराग शेट्टी च क्वार्टर् फाइनलं प्राप्तवन्तौ ।**